# shrI kirAtashAstuH aShTottarashatanAmastotraM

# શ્રીકિરાતશાસ્તુઃ અષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information


Text title : kiraatashaastuH aShTottarashatanaamastotram

File name : kiraata108stotra.itx

Category : aShTottarashatanAma, deities_misc, stotra

Location : doc_deities_misc

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma antaratma at Safe-mail.net

Latest update : April 17, 2007

Send corrections to : sanskrit@cheerful.com



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીકિરાતશાસ્તુઃ અષ્ટોત્તરશતનામસ્તોત્રમ્

કિરાતાત્મા શિવઃ શાન્ત શિવાત્મા શિવનન્દનઃ ।
પુરાણપુરુષોધન્વી પુરુહુત સહાયકૃત્ ॥ ૧
નીલામ્બરો મહાબાહુર્વીર્યવાન્ વિજયપ્રદઃ ।
વિધુમૌલિર્વિરાડાત્મા વિશ્વાત્મા વીર્યમોહનઃ ॥ ૨
વરદો વામદેવશ્ચ વાસુદેવપ્રિયો વિભુઃ ।
કેયૂરવાન્ પિઞ્છમૌલિઃ પિઙ્ગલાક્ષઃ કૃપાણવાન્ ॥ ૩
શાસ્વતઃ શરકોદણ્ડી શરણાગતવત્સલઃ ।
શ્યામલાઙ્ગઃ શરધીમાન્ શરદિન્દુ નિભાનનઃ ॥ ૪
પીનકણ્ઠો વિરૂપાક્ષઃ ક્ષુદ્રહા ક્ષુરિકાયુધઃ ।
ધારાધર વપુર્ધીમાન્ સત્યસન્ધઃ પ્રતાપવાન્ ॥ ૫
કૈરાતપતિરાખેટપ્રિયઃ પ્રીતિપ્રદઃ પ્રભુઃ ।
રેણુકાત્મજ શ્રીરામ ચિત્તપત્માલયો બલી ॥ ૬
વ્યાધરૂપધરો વ્યાધિનાશનઃ કાલશાસનઃ ।
કામદેવસમો દેવઃ કામિતાર્થ ફલપ્રદઃ ॥ ૭
અભૃતઃ સ્વભૃતો ધીરઃ સારઃ સાત્વિકસત્તમઃ ।
સામવેદપ્રિયો વેધાઃ વેદો વેદવિદાંવરઃ ॥ ૮
ત્ર્યક્ષરાત્મા ત્રિલોકેશઃ ત્રિસ્વરાત્મા ત્રિલોચનઃ ।
ત્રિગુણાત્મા ત્રિકાલજ્ઞઃ ત્રિમૂર્ત્યાત્મા ત્રિવર્ગદઃ ॥ ૯
પાર્વતીનન્દનઃ શ્રીમાન્ પાવનઃ પાપનાશનઃ ।
પારાવારગભીરાત્મા પરમાત્મા પરાત્પરઃ ॥ ૧૦
ગીતપ્રિયો ગીતકીર્તિઃ કાર્તિકેયસહોદરઃ ।
કારુણ્યસાગરો હંસઃ સિધ્દ સિમ્હપરાક્રમઃ ॥ ૧૧
સુશ્લોકઃ સુમુખો વીરઃ સુન્દરઃ સુરવન્દિતઃ ।
સુરવૈરિકુલધ્વંસી સ્થૂલશ્મશ્રુરમિત્રહા ॥ ૧૨
અમૃતઃ સર્વગઃ સૂક્ષ્મ સ્થૂલસ્તુરગવાહનઃ ।

અમલો વિમલો દક્ષો વસુમાન્ વનગો ગુરુઃ ॥ ૧૩
સર્વપ્રિયઃ સર્વસાક્ષી સર્વયોગીશ્વરેશ્વરઃ
તારક બ્રહ્મરૂપી ચ ચન્દ્રિકાવિશદસ્મિતઃ
કિરાત વપુરારામસઞ્ચારી પરમેશ્વરઃ ॥ ૧૪
ઇતિ શ્રી કિરાતશાસ્તુઃ અષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Antaratma antaratma at Safe-mail.net

*shrI kirAtashAstuH aShTottarashatanAmastotraM*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*